ॐ श्री परमात्मने नमः। अथ अष्टादशोध्यायः। मोक्षसंन्यासयोगः।

| | |
|---|---|
| अर्जुन उवाच<br>संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।<br>त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥ | न हि देहभृता शक्यम् त्यक्तुं कर्माण्यशेषतः।<br>यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥ ११ ॥ |
| श्री भगवानुवाच<br>काम्यानां कर्मणां न्यासम् संन्यासं कवयो विदुः।<br>सर्वकर्मफलत्यागम् प्राहुस्त्यागं विचक्षणाः ॥ २ ॥ | अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।<br>भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥ १२ ॥ |
| त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।<br>यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥ | पञ्चैतानि महाबाहो कारणानि निबोध मे।<br>साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥ १३ ॥ |
| निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।<br>त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥ | अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।<br>विविधाश्च पृथक्चेष्टाः दैवं चैवात्र पञ्चमम्॥ १४ ॥ |
| यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।<br>यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ ५ ॥ | शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।<br>न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥ |
| एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।<br>कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ ६ ॥ | तत्रैवं सति कर्तारम् आत्मानं केवलं तु यः।<br>पश्यत्यकृतबुद्धित्वात् न स पश्यति दुर्मतिः ॥ १६ ॥ |
| नियतस्य तु संन्यासः कर्मणो नोपपद्यते।<br>मोहात्तस्य परित्यागः तामसः परिकीर्तितः ॥ ७ ॥ | यस्य नाहङ्कृतो भावः बुद्धिर्यस्य न लिप्यते।<br>हत्वाऽपि स इमाँल्लोकान् न हन्ति न निबध्यते॥ १७ ॥ |
| दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।<br>स कृत्वा राजसं त्यागम् नैव त्यागफलं लभेत्॥ ८ ॥ | ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।<br>करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥ |
| कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।<br>सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥ | ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।<br>प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि॥ १९ ॥ |
| न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।<br>त्यागी सत्त्वसमाविष्टः मेधावी छिन्नसंशयः ॥ १० ॥ | सर्वभूतेषु येनैकम् भावमव्ययमीक्षते।<br>अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥ २० ॥ |

| | |
|---|---|
| पृथक्त्वेन तु यज्ज्ञानम् नानाभावान् पृथग्विधान्।<br>वेत्ति सर्वेषु भूतेषु तज्ज्ञानम् विद्धि राजसम्॥ २१ ॥ | यया धर्ममधर्मं च कार्यं चाकार्यमेव च।<br>अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ ३१ ॥ |
| यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्।<br>अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्॥ २२ ॥ | अधर्मं धर्ममिति या मन्यते तमसावृता।<br>सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२ ॥ |
| नियतं सङ्गरहितम् अरागद्वेषतः कृतम्।<br>अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥ २३ ॥ | धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः।<br>योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥ ३३ ॥ |
| यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।<br>क्रियते बहुलायासम् तद्राजसमुदाहृतम्॥ २४ ॥ | यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।<br>प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥ ३४ ॥ |
| अनुबन्धं क्षयं हिंसाम् अनपेक्ष्य च पौरुषम्।<br>मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥ २५ ॥ | यया स्वप्नं भयं शोकम् विषादं मदमेव च।<br>न विमुञ्चति दुर्मेधाः * धृतिः सा पार्थ तामसी॥ ३५ ॥ |
| मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।<br>सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६ ॥ | सुखं त्विदानीं त्रिविधम् शृणु मे भरतर्षभ।<br>अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति॥ ३६ ॥ |
| रागी कर्मफलप्रेप्सुः लुब्धो हिंसात्मकोऽशुचिः।<br>हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७॥ | यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।<br>तत्सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम्॥ ३७॥ |
| अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।<br>विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥ २८॥ | विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्।<br>परिणामे विषमिव तत्सुखं राजसं स्मृतम्॥ ३८॥ |
| बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।<br>प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय॥ २९॥ | यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।<br>निद्रालस्यप्रमादोत्थम् तत्तामसमुदाहृतम्॥ ३९॥ |
| प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।<br>बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥ ३०॥ | न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।<br>सत्त्वं प्रकृतिजैर्मुक्तम् यदेभिः स्यात्त्रिभिर्गुणैः॥ ४०॥ |

** Please note the correction in Verse #35*

*Verses 1-40 of Chapter 18 was covered in the academic year 2017-2018 in all Chinmaya Mission Tri-State Centers*

*Verses 41-78 of Chapter 18 shall be taught and studied during the academic year 2018-2019 in all the Chinmaya Mission Tri-State Centers. Please refer to Geeta Chanting Yajna Flyer for the verse assignment for various grades.*

| | |
|---|---|
| (श्री भगवानुवाच - *Continuation*)<br>ब्राह्मणक्षत्रियविशाम्   शूद्राणां च परन्तप।<br>कर्माणि प्रविभक्तानि   स्वभावप्रभवैर्गुणैः॥४१॥ | बुद्ध्या विशुद्धया युक्तः   धृत्यात्मानं नियम्य च।<br>शब्दादीन्विषयांस्त्यक्त्वा   रागद्वेषौ व्युदस्य च॥५१॥ |
| शमो दमस्तपः शौचम्   क्षान्तिरार्जवमेव च।<br>ज्ञानं विज्ञानमास्तिक्यम्   ब्रह्मकर्म स्वभावजम्॥४२॥ | विविक्तसेवी लघ्वाशी   यतवाक्कायमानसः।<br>ध्यानयोगपरो नित्यम्   वैराग्यं समुपाश्रितः॥५२॥ |
| शौर्यं तेजो धृतिर्दाक्ष्यम्   युद्धे चाप्यपलायनम्।<br>दानमीश्वरभावश्च   क्षात्रं कर्म स्वभावजम्॥४३॥ | अहङ्कारं बलं दर्पम्   कामं क्रोधं परिग्रहम्।<br>विमुच्य निर्ममः शान्तः   ब्रह्मभूयाय कल्पते॥५३॥ |
| कृषिगौरक्ष्यवाणिज्यम्   वैश्यकर्म स्वभावजम्।<br>परिचर्यात्मकं कर्म   शूद्रस्यापि स्वभावजम्॥४४॥ | ब्रह्मभूतः प्रसन्नात्मा   न शोचति न काङ्क्षति।<br>समः सर्वेषु भूतेषु   मद्भक्तिं लभते पराम्॥५४॥ |
| स्वे स्वे कर्मण्यभिरतः   संसिद्धिं लभते नरः।<br>स्वकर्मनिरतः सिद्धिम्   यथा विन्दति तच्छृणु॥४५॥ | भक्त्या मामभिजानाति   यावान्यश्चास्मि तत्त्वतः।<br>ततो मां तत्त्वतो ज्ञात्वा   विशते तदनन्तरम्॥५५॥ |
| यतः प्रवृत्तिर्भूतानाम्   येन सर्वमिदं ततम्।<br>स्वकर्मणा तमभ्यर्च्य   सिद्धिं विन्दति मानवः॥४६॥ | सर्वकर्माण्यपि सदा   कुर्वाणो मद्व्यपाश्रयः।<br>मत्प्रसादादवाप्नोति   शाश्वतं पदमव्ययम्॥५६॥ |
| श्रेयान्स्वधर्मो विगुणः   परधर्मात्स्वनुष्ठितात्।<br>स्वभावनियतं कर्म   कुर्वन्नाप्नोति किल्बिषम्॥४७॥ | चेतसा सर्वकर्माणि   मयि संन्यस्य मत्परः।<br>बुद्धियोगमुपाश्रित्य   मच्चित्तः सततं भव॥५७॥ |
| सहजं कर्म कौन्तेय   सदोषमपि न त्यजेत्।<br>सर्वारम्भा हि दोषेण   धूमेनाग्निरिवावृताः॥४८॥ | मच्चित्तः सर्वदुर्गाणि   मत्प्रसादात्तरिष्यसि।<br>अथ चेत्त्वमहङ्कारात्   न श्रोष्यसि विनङ्क्ष्यसि॥५८॥ |
| असक्तबुद्धिः सर्वत्र   जितात्मा विगतस्पृहः।<br>नैष्कर्म्यसिद्धिं परमाम्   संन्यासेनाधिगच्छति॥४९॥ | यदहङ्कारमाश्रित्य   न योत्स्य इति मन्यसे।<br>मिथ्यैष व्यवसायस्ते   प्रकृतिस्त्वां नियोक्ष्यति॥५९॥ |
| सिद्धिं प्राप्तो यथा ब्रह्म   तथाप्नोति निबोध मे।<br>समासेनैव कौन्तेय   निष्ठा ज्ञानस्य या परा॥५०॥ | स्वभावजेन कौन्तेय   निबद्धःस्वेन कर्मणा।<br>कर्तुं नेच्छसि यन्मोहात्   करिष्यस्यवशोऽपि तत्॥६०॥ |

| | |
|---|---|
| ईश्वरः सर्वभूतानाम्   हृद्देशेऽर्जुन तिष्ठति।<br>भ्रामयन्सर्वभूतानि   यन्त्रारूढानि मायया॥ ६१॥ | अध्येष्यते च य इमम्   धर्म्यं संवादमावयोः।<br>ज्ञानयज्ञेन तेनाहम्   इष्टः स्यामिति मे मतिः॥ ७०॥ |
| तमेव शरणं गच्छ   सर्वभावेन भारत।<br>तत्प्रसादात्परां शान्तिम्  स्थानं प्राप्स्यसि शाश्वतम्॥ ६२॥ | श्रद्धावाननसूयश्च   शृणुयादपि यो नरः।<br>सोऽपि मुक्तः शुभाँल्लोकान् प्राप्नुयात्पुण्यकर्मणाम्॥ ७१॥ |
| इति ते ज्ञानमाख्यातम्   गुह्याद् गुह्यतरं मया।<br>विमृश्यैतदशेषेण   यथेच्छसि तथा कुरु॥ ६३॥ | कच्चिदेतच्छ्रुतं पार्थ   त्वयैकाग्रेण चेतसा।<br>कच्चिदज्ञानसंमोहः   प्रनष्टस्ते धनञ्जय॥ ७२॥ |
| सर्वगुह्यतमं भूयः   शृणु मे परमं वचः।<br>इष्टोऽसि मे दृढमिति   ततो वक्ष्यामि ते हितम्॥ ६४॥ | अर्जुन उवाच<br>नष्टो मोहः स्मृतिर्लब्धा   त्वत्प्रसादान्मयाऽच्युत।<br>स्थितोऽस्मि गतसन्देहः   करिष्ये वचनं तव॥ ७३॥ |
| मन्मना भव मद्भक्तः   मद्याजी मां नमस्कुरु।<br>मामेवैष्यसि सत्यं ते   प्रतिजाने प्रियोऽसि मे॥ ६५॥ | सञ्जय उवाच<br>इत्यहं वासुदेवस्य   पार्थस्य च महात्मनः।<br>संवादमिममश्रौषम्   अद्भुतं रोमहर्षणम्॥ ७४॥ |
| सर्वधर्मान्परित्यज्य   मामेकं शरणं व्रज।<br>अहं त्वा सर्वपापेभ्यः   मोक्षयिष्यामि मा शुचः॥ ६६॥ | व्यासप्रसादाच्छ्रुतवान्   एतद्गुह्यमहं परम्।<br>योगं योगेश्वरात्कृष्णात्   साक्षात्कथयतः स्वयम्॥ ७५॥ |
| इदं ते नातपस्काय   नाभक्ताय कदाचन।<br>न चाशुश्रूषवे वाच्यम्  न च मां योऽभ्यसूयति॥ ६७॥ | राजन् संस्मृत्य संस्मृत्य   संवादमिममद्भुतम्।<br>केशवार्जुनयोः पुण्यम्   हृष्यामि च मुहुर्मुहुः॥ ७६॥ |
| य इमं परमं गुह्यम्   मद्भक्तेष्वभिधास्यति।<br>भक्तिं मयि परां कृत्वा   मामेवैष्यत्यसंशयः॥ ६८॥ | तच्च संस्मृत्य संस्मृत्य   रूपमत्यद्भुतं हरेः।<br>विस्मयो मे महान् राजन्   हृष्यामि च पुनः पुनः॥ ७७॥ |
| न च तस्मान्मनुष्येषु   कश्चिन्मे प्रियकृत्तमः।<br>भविता न च मे तस्मात्  अन्यः प्रियतरो भुवि॥ ६९॥ | यत्र योगेश्वरः कृष्णः   यत्र पार्थो धनुर्धरः।<br>तत्र श्रीर्विजयो भूतिः   ध्रुवा नीतिर्मतिर्मम॥ ७८॥ |

ॐ तत् सत्।

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः॥

श्री कृष्णार्पणमस्तु॥